This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 1953 विषय कर्मकांड
नाव. कर्कभाव्य (षष्ठोऽध्याय) ज्योतिष्टोमयज्ञ
लेखक/लिपीकार ?
पृष्ठ 18 काळ ____ पूर्ण/~~अपूर्ण~~

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

का कि प्राप्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कं.प्र. १

ॐ नमः ॥ ॥ प्रत्यनुकरणकारिणाचार्येणाचातुर्मास्यानि सम्यग्विहितानि। इदानीं श्रुतिमंत्रपाठवशप्राप्तोऽग्नी
षोमतंत्रोस्मार्यहविर्यज्ञत्वसाम्यान्मित्रविन्दानुविहिता। हविर्यज्ञत्वसामान्यादेवेदानीं निरूढपशुबंधोनुवि
धेयः। हविर्यज्ञत्वसामान्यंच हविर्यज्ञविधोहगत्यन्यः पशुबंधः षड्विधोन्य इति श्रुतत्वात्। अप्येवमाग्निसाध
नकत्वसामान्यादग्नीषोमीयविधिं तत्राह कुर्वं। अग्नीषोमीये हि धर्म्मसंगाविशसनादीनां विहितत्वात्। इहत्वा
विधानात्तथाचविशसनादीन्यग्नीषोमीयात्प्राप्तानन्नुवदति। तस्मादुपशुं दंष्ट्रे मे ब्रूयाद्वेतानुमुहूर्त्तेमिति
। तथा च तत्तद्रूपपरिप्राप्तो सत्यांजातायं तरविधानं। तस्मात्पालाशमेवयूपं कुर्वीतेति। तेन निरूढपशुबंधं अं
गीकृत्याग्नीषोमीयधर्म्माणामनुकथनं क्रियते। अग्नीषोमीयधर्म्माणां हि सोमिकैर्धर्म्मैरत्यंतसन्निपातात् इह
धर्मानुकथनं पुष्कलरूपं। तत्र पुनरतिदेशेन धर्म्मान्वक्ष्यति। अत्र वक्ष्ये श्रिसौत्रामणीयपशुषु निरूढप्रकृतित्वमि
ष्यते तत्सु मन्नातीवयुक्तरूपं। येन न हि निरूढः प्रकृतिभूतः तेनापि ह्यग्नीषोमीयादेवधर्मा गृहीताः। न च वभि
हुकोमिक्षुकाम्याचतइति। अतस्तेष्वग्नीषोमीयविधं तत्राह कापूरा। नहिते षानुमानिकवचनापगादेव न
प्रत्यक्षशिष्टं वचनं नाम वाविघते यथावैश्वदेवधर्म्माश्चातुर्मास्येषु। सोमाद्वावश्यइति। तस्मादग्नीषोमीय ग०
प्रकृतित्वमेव तेषपीति। अग्नीषोमीयप्रकृतित्वेच सत्यन्वारंभणीयानभवति। आरंभनिमित्ताहि सानचाग्नीषोमी १

यस्यारंभोस्ति। तेन पैत्रकारिकन्यायेन अग्नीषोमीयेऽप्यभावादिहापि न भवति। ननु च दर्शपूर्णमासप्रकृतित्वेनान्वा
रंभणीयाप्राप्ता। तत्र पृथगारंभाभावान्न क्रियते। निरूढादिषु तु पृथगारंभस्य विद्यमानत्वादस्त्वन्वारंभणीयेति
। यथान्वाहार्यो दर्शपूर्णमासप्रकृतित्वेनाग्नीषोमीयं प्राप्तः सोमिकत्वाद्दक्षिणया निवर्त्तितः पुनस्तद्विकारेषु प
त्वदक्षिणाम्नानं नास्ति तत्र प्रवर्त्ततो रात्रवमेवान्वारंभणीयापीति। नैतदेवं। अग्नीषोमीये हि अन्वारंभेणप्रवृत्तोऽ
न्वाहार्यो गवांशेन निवर्त्यते। तद्विकारेषु अनुवर्त्तमानः केन निवार्पेत। अन्वारंभणीयापुनर्नकेनचिन्नि
वर्त्यते। आरंभनिमित्तत्वात्। तदभावाच्चाग्नीषोमीयस्यानंगमन्वारंभणीया। अतस्तद्विकारेष्वप्रवृत्तिरिष्य
ते। इमलक्षणमतिप्रसंगेनाप्रकृतमिदानीमभिधीयते॥ ॥पशुश्चेत्प्रोर्ध्व(?)वत्सरे संवत्सरे प्रावृषि कर्त्तव्योति सूत्रशे
षः। पशुनात्वयापश्चिस्याषाच प्रतिसंवत्सरं कर्त्तव्येति। तेन संवत्सरे संवत्सरे इत्युक्तं नित्यत्वं हि परिभाषायामुक्तमे
वादाचायणाग्रयणपशुषु प्रवृत्तेरिति। अपि चाहातंवै संवत्सरो नानीजानमत्तोपादिति। सा च प्रावृषि प्रावृट्काले
न वर्षाऽव्याकर्त्ता(?)। तेन सुपवसेयन्तेनेति श्रुतेः। सुपवसा ह्यवर्षाः॥ आवर्त्तिमुख्योपोषपक्षिस्याभवति वा प्रावृषि। आ
वृत्तिशेषेन तहरगयनदक्षिणायनेतच्येते। तयोर्मुख्यमावृत्तिमुख्यं प्रथममहस्तत्र कर्त्तव्यानापौर्णमास्यमावास्या
वापेक्ष्यते। संवत्सरे संवत्सरे इति चोक्तत्वाद्कैव क्रियानाभ्यासपीति। गृहेषु। देवयजनान्तरेग्नीषोमीयस्यदृष्टत्वात् इ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कु॰यू॰ २

हापितन्मा भूदिति गृहे घिसुच्यते। तेन गृहे शुयजेतेति वचनात्। अपरेत्व यमनुवास्तीति मन्यते। नद्धारवसानमग्नी
षोमीयेस्विष्टे यार्थे ज्योतिष्टोमप्रकरणे विधानात्। नाशार्थत्वात्। प्राग्वंशिकं अग्नीषोमीयपशु। एवं चसति न्यायसूत्र
मेवैतद्गृहे घिति। यद्येवं समारोपो विप्रकृष्यते समधीनत्वात् ज्योतिष्टोमार्थ एव प्राग्वंशिको अग्नीषोमीयपशुरिति न पश्चात्तेरे
पुनः प्रवर्त्तेते। नैतदेवं। समारोपोऽग्निसंस्कारः अग्नेश्चांगप्रधानार्थता। यदाहवनीये जुहोतीति वचनात्तस्मात्प्र
वर्त्तत एव समारोपः। अतरम्योत्तरवेदिः संभाराश्च प्रवर्त्तेते॥ सूपाहुतिं जुहोति चतुर्गृहीतं स्रुवेणाग्नेनु विष्णवि
ति। सप्रदिष्टु चाजुहोति चतुर्गृहीतमाज्यं गृहीत्वा जुहोतीय युद्धं वे राक्षुवे भौवोपहत्य जुहोतीति वचनाद्धि कुलः
। इयं च सूपाहुतिरग्नीषोमीयपश्वर्थाहृष्टा। सूपं वृक्ष्यन्त्वैष्णम्य जुहोति। तत्र च वृक्षस्य छेदनात् तम
वेक्षणं कृतं इहापि वृक्षस्य छेदनोत्तरकाले तेव गम्यते॥ आज्यशेषमादाय सतक्षा गच्छति यूपो यत्रास्यं परिशिष्टं भ
वतीति वचनात्। वृक्षस्य सुपरिष्ठात् सूपान्तेन गिन्नं मधिवेस्यतश्चा विवृक्षायं। अभिमच्छात्यत्यन्यानिति। यूपम
भिमृशत्यत्यन्यानिति यतेन मंत्रेण॥ प्राङ्तिष्ठन्नभिमंत्रयते वा। अनेनैव मंत्रेणेति। सूचायं तु लम शाखयाविति क एम॰ २
ल्पः॥ ॥ पलाशं वृक्षस्थपर्णे मत्वा कृश्मूर्द्धमकुलछाखं मध्यारोपनतमवृक्षणं। निःसृष्टेहि श्रूपतेतस्मात्पालाश
मेव यूपं कुर्वीतेति मध्यारोपनतं यंच निःसृष्ट एव तत्रैव पाठात्। अथ यस्य अनन्तत्र परिशिष्टादुपनतो मध्यइति। अन्य

त्रानियमः॥ अभावेस्वदिरविल्वरौहीतकाम पालाशाभावेस्वदिरादयो भवंति। खदिराभावे सोमहत्वरात् ज्योतिष्टोमे
खदिराभावे बिल्वरौहीतकाभ्यां कुर्यात्। पालाशस्तु निःसृष्ट एवेति सिद्धं रायः। खदिनाभावे सोमहत्वरानिति वृद्धवच
न मुखारणार्थं। यूपव्यक्तिमेदापेक्षं वा॥ ॥ स्रुवेणोपस्पृशति विष्णवे त्वेति। वृक्षार्थं वा घस्मिन्नग्रे शेछेदनं तत्रैवोप
स्पृशन्॥ ओषधइति कुशतनुणं तिरस्कृत्य स्वधितइति परशुना प्रहरति। ओषधइत्यनेन मंत्रेणानृणामंतर्दीप स्वधित
इत्यनेन मंत्रेण परशुना प्रहरति॥ प्रथमशकलं निदधाति कार्यार्थं। अनक्षसंगं वृश्चति। यथाक्षस्यापर्तं भवं
स्थाणुर्भवति तथा छिद्यते तो एकं जं॥ एकस्त्वयो जातः। घांमालेखीरिति पतंतमभिमंत्रयते यूपं॥ नदक्षिणापते
त्। सवनदक्षिणापतेत्। अयं हि त्वेति शोधनं कुर्यात्। मंत्रलिंगात्। अयं हि त्वा स्वधितिस्तेतिजानः प्रणिनायेति
। अभिमंत्रणेशेषोपदेशात्। वाशब्दः पक्षव्यावृत्तौ। अयं हि त्वेत्यभिमंत्रणेऽशेष एव भवति न शोधने कृते एतत् वि
शेषोपदेशात् तं प्रत्यवमानमनुमंत्रयते घांमालेखीरिति॥ मंत्राणां वा विधायकत्वात्। अतस्त्वमिति यावत्त श्चेनेजुहो
ति॥ आव्रश्चने चापादानसाधनत्वेनस्थाणुरभिप्रेतः। अथ आव्रश्चनमभिजुहोतीति श्रुतत्वात्। यूपेवानसंस्कारा
त्। यूपेवाजुहोति न स्थाणौ कृतं एतत्। तत्संस्कारता यूपस्य हि संस्काराः भिप्रवर्त्तेः। स्थाणौ श्रुतत्वात्। स्थाणौ वा जु
होतीन यूपेकृतमेतत्तू श्रुतेः अथाव्रश्चनमभिजुहोतीति सक्षसाहनेत्यतानाक्षारस्यो स्पन्नत्तिषामिति यूपं छिन्ने अनु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३

नेतअनेरक्षांसिअनक्तिधानितिवतोवाआज्यनद्ध ज्जेसौगैतिन्नाष्ट्रारक्षांसं स्ववबाधतइतिश्रुतेः। दशहृन्मंत्रवशीाच्चा
अतस्तंदेववनस्पतेशतवल्शोविरोहेति। यस्तंमयाद्यस्क्तःसशतशाखोविरोहेतिमंत्रवर्शेनिस्थाणुरेवाभिधीयतइ
ति[illegible]। स्थाणावपिहोमक्रियमाणोयूपीयःस्थाणुरितिभवप्रेवाद्दष्टोयूपसंस्कारः। अतस्थाणावेवहोमइ
ति॥ परिवास्याच्छेदनंपुनः। परिव्यैवैवसिंच्छेदनार्थेः परिवास्यच्छिवायूपाग्रंपुनःच्छेदनंनकर्तव्यं। अरत्निमा
ःनुरत्निर्द्वौपरिवास्यंतेसवाएषअरत्निर्द्वैवचतुररत्निर्वायूपश्चुवंधयूपोभवतीतिवचनात्॥ एकारत्निसम्मतीरेवे
॥ एवमपिहिस्रूयतेमयसम्भुनापक्ष्यमाणाएकारत्निर्द्वैवचतुररत्निर्वापश्चुवंधयूपोभवतीतिवचनात्॥ एकारत्नि
सम्मतीनेवे। एवमपिहिस्रूयतेमयसम्भुनापक्ष्यमाणाएकारत्निंयूपंकुर्वतइममेवतेनलोकंजयत्यथपद्यरत्निमं
तरिक्षलोकमेवजेनयतीतिएकेतन्त्रेछन्निनद्येनौविधीक्रियतेहिअवपूयवादेनसंस्तवोयंयेनोपसंहरतिस्वा
राषअरत्निर्द्वैवचतुररत्निर्वापश्चुवंधयूपोभवतीति॥ अष्टाश्रिंकरोत्युपरवंजे॥ अतनुंइत्तन्तो आपारःएवंहि
तद्धूआनयनंदृष्टार्थंभवति। उपरवंजमितिनिरवशब्देनउपराहैःप्रदेशोभिधीयते। उपराहप्रदेशवर्जमष्टाश्रिं
करोति। अग्रंच्चबालंदृथुमात्रमष्टाश्रिमाप्पसंगृहीतंकरोतीत्यनुषंगः। दृथुशब्देनांगुष्ठविरांगुलिःपाणिराम एम॰ ३
तोवंधनात्उच्यते॥ ॥ऊर्ध्वमग्रेप्रतिमुञ्चतिशांगुलंअंगुलंवान्तद्वीतिक्रांतयूपस्य॥ सेत्रायमधुनाउपदेशःप्रतिमोक

स्वंजनोत्तरकालेण॥ ॥पंचारत्निःपंचदशपर्यन्तः सोमेरक्षशमनत्त्वनुदेशावर्जमपरिमितोवा भवतियूपः। एवमपिहि
अपतइति। एवमदशवाजपेयस्यसप्तदशारत्निः श्रवमेघेयथाकाम्यः स्यादिमा। स्यौसंवपयाद्धापमेवप्रेभगतिनचत
क्षणेन अग्रतुल्यमप्रमाणात्॥ ॥वैदिकंकरिष्यन्नपद्वानांपंचगृहीतमनयानुद्रुत्यजुहोत्येकामाहुतिंपंचवाघोः
दृष्णमिति। प्राग्वैदिककरणान्तूषदोनारं मंत्रमनयानुद्रुत्यपंचगृहीतंजुहोतिपंचभिर्वाविग्रहैः स्रुचायंहोमोनि
रूढएवभवतितत्रैवपाठात्नाग्नीषोमीयइति। वैदिकंकरोति। किमर्थमनयसेर्वेदिंकुरणानुक्तंपरिस्तरणादी
नुपरिष्टाद्वक्ष्यत्याचार्यइति। उपयतेनयातिष्टोमिषुजरवेदिर्द्विहितात्मत्रचाहवनीयनिधानमुक्तं अग्निमात्र
स्यामाधाप्यन्नवतीत्यनेन। सचायमग्निसंस्कारः अंगप्रधानार्थेवाच्छागेनः अग्नीषोमीयेमाप्नोत्यग्नीषो
मीयानुपक्षणेतत्रैवधाविनोत्तरवेदिर्धवत्यतःस्वाव्यग्रेद्दिपहृष्यतेनेनविदिंकरोतीत्युक्तं। वनुणाप्र
धानमत्याधानिनिधानात्। ग्रनुणाप्रधानिरूपदेशायनमनुपमेपरिप्राप्तिः॥ ॥स्क्रमिध्येनमप्रणायति॥
तत्रहिकुष्पेरेणप्रणयनंदृष्टं। रहेत्कमिध्मेनोच्यते। तत्कृतः। ज्योतिष्टोमेहीध्मेनप्रणयनंदृष्टं। एकाहव
नीयसंस्कारः। अंगप्रधानार्थेवावितस्मान्नीषोमीयेषामित्तिः तस्मक्रतिबाच्चपश्वंतरेषु। तेनेहैकमिध्मेनेत्यु
च्यते। एवंचकृत्वाएमात्तेयोप्यत्रभवत्येव। ततोपायनप्रणीताअभागमागाखदानप्रणीपात्रविमुक्तमाद्वायोदविपह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ विधोव्रतोपायनप्रयोगाज्यभागानामन्वयप्राप्तानां सर्वविधेप्रतिषेधार्थे निरूढेच प्रतिप्रसवार्थं वचनम्। आगाव
द्दानानिरुक्तोग्नं ब्रह्मणोग्नीहं यजमानापवुरीततमद्यर्थे वेदइत्येवमादीनि अग्नीषोमीयमायातानि। तत्र शाखा
न्तरे प्रतिषेधात् विकारपशूनुपगच्छन्ति। तेनेह विधानेऽग्नीषोमीयनिषेधार्थे तत्र च निषेधात् प्रश्नांतरे प्रवृत्तो
निरूढेविकल्पं वक्ष्यतिह्वोमग्नीहाप्यश्लीपुरीततं चेच्छन्तीति। अतो भागाद्दानानामग्नीषोमीये आवश्य
निरूढे विकल्पोन्यत्रानियम इति। इष्टीपात्रविमुक्तमपोह्य निरूढस्य विधानं। दक्षिणाग्निहोमां तत्वादग्नी
षोमीयस्यान्यत्राप्रवृत्तिरेव तथा चाह। हविर्यज्ञविधो ह वा अस्य पशुबंधः सर्वविधोस्य इति प्रकृत्याहैष हवि
र्यज्ञविधो यस्मिन्व्रतमुपनयति यस्मिन्नपः प्रणयति यस्मिन्स्रुणे पात्रे निनयति यस्मिन्हविष्कृतमाक्रमयत्यथ
हैष एव विधो यस्मिन्नेतानि न क्रियन्त इति॥ ॥ परिस्तरणापात्रासादनं प्रोक्षणाज्यनिर्वपणाधिश्रयणा
नि कृत्वोत्तरपरिग्रहादि करोत्याज्यासादनात्॥ परिस्तरणादीनामुपादानं वैकृतपदार्थक्रमे नंतरं प्रा
कृतानुसंधानार्थं॥ स्वननावसनविधानार्थं च। उत्तरपरिग्रहादि करोत्येनेन चोत्तरपरिग्रहस्य पदार्थोत्तदा
दिकरोत्याज्यासादनादिति। अत्र विशेषः सिद्धं दाज्यमाज्यग्रहणं। तस्य चानुयाज्यार्थत्वेनुक्तमेव॥ बर्हिषि श्रम°
प्रक्षणागम्भरणाति। अवसर्पणं तयाविधानाच्छरणाधिकाराच्च बर्हिस्तरणासमनंतरमेव प्रक्षणाशास्त्रानंतरं॥ ॥ ५

देवस्यत्वेत्यभ्रिमादाय यूपावटं परिलिखतीदमहमित्याहवनीयस्य पुरस्तादंतर्वेद्यर्धमर्द्धं। अंतर्वेदिखनयूपार्द्धस्यां
गत्वेनोच्यते किंतर्हि देशलक्षणोपं यूपमाने प्रकृत्यवचने हि भवति। अर्द्धमंतर्वेद्यर्द्धं बहिर्वेदीति। तत्र यूपार्द्ध
स्याग्रं गत्वेन वेदिविधाने ऽर्द्धं बहिर्वेदीत्यनेन तदपि विधेयं। तथा च वाक्यमेव प्रसंगः। देशलक्षणार्थत्वे पदापेन
भवति। तेनैकवाक्यत्वे सति नानेकवाक्यतायुक्ता यूपाग्नेर्दृष्टपक्षिक समाप्रसंगाता। चिंतायाः प्रयोजनम
तीव्रमुतिमाचोवेदिर्नकर्त्तव्येत्यनेन गत्वात्॥ ॥उपरसम्मितं खनति। उपरशब्देन चोपराहः प्रदेशो लक्ष्यते। उप
राहप्रदेशसम्मितं खनतीत्यर्थः॥ ॥ प्राचः पांसूनुद्वपति। तस्योन्यपसंपांसु वेनिदधाति। तच्छदेनावटः परा
मृश्यते॥ ॥ कुशमुष्टिमुपरितस्मिन्। यूपप्रथमशकलं च॥ वशाद्वाप्यर्पवे। अग्रमुत्तरेणाचषालं। निदधा
तीत्यनुवर्त्तते। पवित्रसीत्युपवानोपप्रोक्षत्यग्रमध्यमूलानि दिवेत्वेतिमंत्रं। आपस्त्वतीषपिप्रणी
ताम्॥ लोकिकस्यस्वगष्वंतो साक्षाप्यंगप्रधानार्थाः प्रणीताः तद्विकारत्वशाद्वगार्थो नमिवस्रा त्यस्वरः ति
नाद्ब्वेवाघृपक्वं मायाद्यप्रवृत्तिरिति॥ ॥ प्रोक्षणीतिधर्मवेदपात्रांक्षत्वात्पगाः। अवटे शेषमासिंचति
शुंधतामिति। शेषप्रतिपत्तिरवटसंस्कारश्चायं। अतो यूपेक्षाद्दक्षिण्यामवटसंस्कारः कर्त्तव्यः। बर्हिषिप्रा
सुदं चित्रप्रास्यति पितृषदनमसीति। अवटे बर्हीषि प्रागग्राण्युदगग्राणि वा प्रास्यति पितृषदनमसीत्यनेन मंत्रे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

का॰सू॰ ५

णाप्रथमशकलं चाग्रेणीप्रोषीति। आप्यतो समनुमन्त्रयते। स्त्रुवेणावद्देनुहोतिरस्त्री। रस्त्रौमित्युक्त्वा तस्वाहाकारो न पि
भवति। पुरस्तात्परिक्रम्याध्वर्यु यजमानो वाचूपमन्वक्तुदपविश्य परिक्रमणं चापगतमानस्योच्यते। मामृत्सन्नि
धानादपरिक्रमणमिति। यूपायाज्यमानायानुवाचयति। अत्र समाम्नस्य यूपस्यानुवाचनं कारयति। तपर्थेन त
स्यैव यूपायाज्यमानायानुब्रूहीति। देवस्त्वेत्यनक्ति प्रपंच स्वालमुभयतः अनक्तीति क्तैते। देशमेदाघो भ
यत्र मंत्ररस्तुक्तं अग्निहमागौ। अक्तं प्रतिमुंचन्ति सु पिप्पलाभ्य स्त्रुति। अक्तं एव पुनरक्त्य ग्रहणं च स्वालनिर्दि
शार्थं। अक्तं च स्वालं प्रतिमुञ्चती स्पर्थः प्रतिमुंचामी। तिवात्र मंत्रशेषः। सोपरमग्निघांदेशमक्त्वा परिव्य
पर्णादेशं समंत्रं परिमृश्य पाध्वर्युन्निविसृजेदापरिव्ययणात्॥ सहोपरे गाग्निघांदेशं पुनरक्त्वा परिव्यय
णादेशं समन्त्रं परिमृश्य यूपमध्वर्युर्न विसृजेदापरिव्ययणात्। सोपरमग्निघांदेशाज्ज्ञानं वक्त्वा प्रत्यपोप
देशादध्वर्योरितिकेचित् इमिप्रवृत्तं चावयजमानस्येति तिं प्रदायः॥ ॥ अंजौ यमाणायानुवाचयति॥ यूपाय
स्त्रानुवक्त्ततो धामग्रेणेत्युच्छ्रपति॥ यूपं॥ यात इति भिनोत्यग्निष्ठासंप्रसाहवनीयं। पातइत्यनेन मंत्रेण
चटप्राक्षिपति यथाग्निष्ठासंप्रत्याहवनीयं भवति। एवं च सति यूपैकादशिन्यां स्वांग्निष्ठासंप्रत्याहवनीयं क एम॰
जेयाः॥ ॥ ब्रह्मवनिवेति पांसुभिः पर्यूहति। पांसुभिः पूरयति गर्तम्॥ ब्रह्मदृंहेति मैत्रावरुणदंडेन समंततः परिषति। ५

। मैत्रावरुणदंडेन दृढीकरोति। समं भूमिं कृत्वाद्भिरनुपसिच्य विष्णोः कर्म्माणीति वाचयति यूपमन्वारब्धं। समं भूमिं कृत्वाद्भिरुप
सिच्य गर्तं विष्णोः कर्म्माणीति वाचयति यजमानं यूपमन्वारब्धं सवापमुभयसंस्कार इति संप्रदायः। यूपसंस्कार एवेत्यपरे।
उभयसंस्कारपक्षे च बहुयजमानके सर्वेषां वाचनमेकस्यान्वारंभः॥ ॥ तद्विष्णोरिति चषालमीक्षमाणं। वाचयतीत्य
नुवर्त्तते। परिवीयमाणायानुवाचयति त्रिगुणा त्रिव्यामा कौशी रशना तया नाभिमात्रे त्रिवृतं परिव्ययति परिवीरसी
ति। त्रिगुणापात्रिव्यामया कौशया रशनया नाभिमात्रे त्रिवृतं परिव्ययति परिवीरसीति नाभिमात्रं च यज
मानविषयं॥ ॥ संस्तपान्यरजस्यामंतप्रवेशयति। संस्तपरशनामध्यतरस्यां रशनायां मंतगोपायति। यूपश
कलमस्यामवगूहत्युत्तरेणाग्निष्ठां दिवः सूनुरसीति॥ यूपशकलमस्यां रशनायामवगूहत्युत्तरेणाग्निष्ठां दिवः
सूनुरसीति॥ यूपशकलमस्यां रशनायामवगूहत्युत्तरेणाग्निष्ठां दिवः सूनुरसीति॥ ॥ बहुषु यथास्वं। बहुषु यूपेषु य
थास्वमवगूहनं॥ उपावीरसीति तृणमादाय तेन पशुमुपस्पृशत्युपदेवानिति। पशुमात्रप्रायोविदमुच्यते॥ छागं मंत्राम्ना
नात्। एव पशुः छागो ग्रहीतव्यः। कुत एतत्। मंत्राम्नानात्। अग्नीषोमौ छागस्य हविष आत्तामिति। तेन पशुशब्दश्छा
गविषय इति गम्यते। पत्रदमव्यंगं। उपस्पृशति॥ पत्रदो निगमेषु जातं दन्तरस्सुक्तः। अव्यंगोऽस्त्रनांगः॥ ॥ पशु
मंत्रवर्णो प्रोक्षणी। प्रोक्षणमंत्रेयाद्दशाभिहितः। अनुत्वामातामन्यतामनुपितानुभ्रातेत्येवमादिमानमामिस्त्रमात्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क.पू. ६

नमामितिमंत्राभिधानसामर्थ्यात्। नावोदितत्वात्। नैतदेवं। नह्येवंविधावोदनेति। मंत्राणांवाविधायकत्वात्॥ अ
ग्निंमंथस्याहोमान्करोति। गुणविधिश्चात्रास्यधर्म्माभावेनतत्परिप्राप्त्यर्थमाहोमादिनक्रियते॥ उपाकरणमंथ
नेन॥ उपाकरणांतरोनोपयुक्षेनमुक्तं। तस्यपुनरनुच्चारणमंथनसंनियोगशिष्टत्वात्सत्त्रिपुरूपोर्द्धिकल्पोयथा
स्यादिति। द्विगुणाख्यान्याद्विव्यामपाकोपपाशांकृत्वानराश्वंगमभिदक्षिणेवध्नातत्तस्पृष्टेति। पाशंकृत्वा
प्रतिमुंचतीतिवचनात्। देवस्यत्वेतिपूपे। वध्नातीत्यनुवर्त्तते॥ ऐन्द्राग्नःसौर्य्यःप्राजापत्योवाग्पमिद्धेत्। त्रयो
पिहिदेवताविशेषाविकल्पेनअपेतेवा। अत्रहिकल्पपरिमाणोपमिद्धेदित्साहिविकल्पार्थमुक्तंयामिद्धेतेसमै
वकुर्यात्। अग्नयेत्वेतिपशुंप्रोक्षणीभिःप्रोक्षतिप्रोक्षणीशब्दश्चयौगिकोपिसंस्कृतप्रोक्षणीविषयःप्रोक्षणपुण
दानसामर्थ्यात्॥ अपांपेरुरित्यास्यउपगृह्णाति॥ आस्योपग्रहणंचपानापट्टस्यार्थत्वात्तथाचाश्वमेधेश्रूयते। त
र्पेपित्वाश्वंपुनःसंस्कृतप्रोक्षणीरितराभ्यमन्त्र्योक्षती। ति॥ आपोदेवीरित्यधस्तादुपोक्षति। अघस्रअधस्तादुपोक्ष
तीतिवचनात्॥ इध्मप्रैषादिकरोत्याप्रयाजेभ्यः वैकृतसमनन्तरंप्राकृतानुष्टत्यर्थमिदमुक्तं। आद्रियहणेन
चहोतृषदनादिद्रष्टव्यं। तेदवहिनकृतंपद्धेमिति। उत्तराघारमाधायपशुपूर्वेसमनक्तिललाटं स्रुवेणाधिपुसंत एम० ६
इतिप्रतिमंत्रं। प्रकृतोहिउत्तराघारसमनंतरंधुवासमंजनमुक्तंतेनेह। घृतेनपशुपूर्वेःसमनक्तीति। अनेनचज्ञापके

नयत्रप्राकृतवैकृतयोःसमवेशस्तत्रपूर्वंप्राकृतमिति। यथाभाघहवींषिहुत्वाभाघहवींष्यग्निंमंथतीति
। यथाचप्रत्यूह्यत्रणमातस्मानमालभतेप्रहत्यतृणंआजिनेनचरतीति। समंगानियजत्रैरित्यत्रगच्छतामित्यध्या
हारोनानुषंगः। एकवाक्यताभावात्। एवंचसतिसंयजपतिशाशिषेत्यत्रापिगच्छतामित्यध्याहारोनानुषंगः। प्र
वैराग्यवहितत्वात्। अतश्चोभयत्रसंहिताचसंयोगोनभवति। प्रायश्चित्तगतश्चविशेषः। अनुषंगविना
शेष्टोतंप्रायश्चित्तं। अध्याहारस्थाग्गैदिकत्वात्स्मार्तमिति। यजुपतिशब्दश्चत्रनेकयजमानकेविपरिणम्यते।
यथाहुत्वापरिव्ययणेग्निमंथनेच॥ प्रवृत्तहोतारमात्राग्याहा। अग्निर्हिदैवीनांविशांपुरएतेत्येवमादि। आ आव
ह्यांचमैत्रावरुणार्थे। हमैत्रावरुणापोहेवाश्रावयतीतिवचनात्। अग्निर्हिदैवीनांविशांपुरएतायंयजमा
नइतिचयजमानस्यात्रगणेक्रयजमानकेयथाऽऽर्थविपरिणामः। सुवंनितिमुच्यै। सुसेइति। अनुयाज्यार्थे
वरणापुवत्रयजमानइतिप्रयोगः। मैत्रावरुणायदंडंप्रयच्छतिमित्रावरुणयोस्त्वाप्रशास्त्रोः प्रशिषावाप्रय
च्छामीत्योदुंवरंयजमानमुखमात्रं। मैत्रावरुणसंनिधानात्तस्यैवमुखमात्रोमाभूदितियजमानमुखमा
त्रमित्युक्तं। दीक्षितदंडं सोमोदीक्षितदंडंसोमेसमर्पयति॥ ॥ कीलेन। अस्मिन्नावसरहति॥ गएका
दशप्रयाजाअनुयाजाश्चाडपंचैकादशसंख्यात्वंनसंयोगिनीचोदकप्राप्तेषुप्रयाजेषुयागसंख्याश्रूयतेसाम्ना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृ.पू० सैनैवष्टप्येते। पा पुनःहस्तत्तौ संस्वाश्रपतेसाद्यन्को निवेशाद्वैत्रौ भवति। पथाप्रकृतौपंचप्रयाजतितिश्रभ्यासेवसाति
श्रंयस्यैवाभ्यासोन्याप्यः। एवंचहतिश्रभ्यासविनाशेम्रंसएवागर्न्ततइतिश्रनेकद्वता कौनेकपास्या वंश्चपंच
मरवापमिति। एवंप त्रपत्रौ।सन्न संयोगिनी संख्यातत्र तत्राभ्यासेनष्टपेतो पथात्रीणिसमिष्टयपजूंषिजुहो
तीतिकर्माभ्यासः। तिस्रानूबंध्याएकविंशतिरग्नीषोमीयाः पशवइतिद्रव्याभ्यासः। क्कापेतुसर्वत्रैकमेवेति। स
मैत्रावरुणोपप्रैषासाहपजस्थानेवचने॥ समैत्रावरुणोकर्मशिायजेत्पस्यस्थानेप्रैष्यतिवक्तव्यं। पत्रमैत्राव
रुणास्यप्रैषवचनमस्ति। एवंचहति पशौ पत्नीसंयाजेषु प्रैषवचनाभावाद्यजेत्येववक्तव्यं॥ देशेश्वाप्र
याजाः वाहशासमाहरेति। यूपशकलमाहरेतिवक्तव्ये वानोपपद्यते। माध्यंदिनीयायांतुशासमाहरेत्येव।
स्वरुमादायपात्नौ भैजुहूक्योर्ताभ्यांपशौ ललाटमुपस्पृशतिघृतेनाक्तौ विति। स्वरुंगृहीत्वा भावपिस्त्रुवेसी
जुहूक्येऽक्ताताभ्यामेव पशौ ललाटमुपस्पृशति घृतेनाक्ताविति मंत्रेण॥ स्वरुमवगुह्यासिंप्रयच्छन्नाह
घातेमन्नानाम्निरस्त्विति। स्वरुंयूपेप्रत्यवगुह्यशमित्रेऽसिंप्रयच्छन्नाह घातेमन्नानाम्निरस्त्विति॥ ॥सादयि
त्वासुचौ चात्वालमुत्तरेणाशामित्रायोपालिप्स्यति। सुक्रसादनंतुवचनात्। उल्लेखनेनोपलक्षिताश्चपरिस राम०
मूहनादयः सर्वे भवंतीति संप्रदायः॥ ॥पर्यग्नयेनुवाचयाति। पर्यग्निकरणोक्तिप्रमाणोपदृत्तुवाचनंतत्कारयतीत्यर्थः। क

र्यं च तत्कारितं भवति। पर्यग्नयेनुब्रूहीत्येवं तथा च श्रुतिरथाहपर्यग्नयेनुब्रूहीति। पर्यग्निकरणं चाग्नीत्कर्तव्यं प्रैषपश्चात
दंगत्वादग्नीधएवेति संप्रदायः। तथाच श्रूयते। पोतावत्कर्म करोति स एव तस्यापवर्गं वेदेति। श्रपरे त्वध्वर्योरेव
प्रैषदानमिच्छन्ति पर्यग्निकरणमात्र एव वचनमिति। आहवनीयोल्मुकमादायाग्नीत् त्रिः समंतं पर्येति पशुंचा
त्पशामित्रदेशं यूपं चात्वालमाहवनीयानु। आहवनीयोल्मुकं गृहीत्वा पश्चाद्दीनग्नीत्रिः पर्येति॥ आज्यपशुशा
मित्रान्पर्येति न स्वां निति। वाशब्दो विकल्पार्थः। प्रतिमाप्योल्मुकेनावलुप्ततिपर्येति। आहवनीयेप्रक्षिप्या
ल्मुकं। त्रिरेवप्रतिपर्येतिप्रतिशब्दप्रयोगात्स्वामप्रदक्षिणामु॥ ॥पुनरादायोद्वप्रतिपद्यते। पुनरग्नीदाहव
नीयोल्मुकमादायोदङ्कप्रतिपद्यते। पशुश्चान्वङ्क। पशुश्चोल्मुकमनुनीयते। एवं हि श्रूयते। शमितेनं कंठेवध्यान
यतो ति। प्रतिप्रस्थातान्वारभतेरणां वपाश्रपणीभ्यां कार्ष्मर्यमयीभ्यां विशाखाविशाखाभ्यां। तं वपाश्रपणीभ्यां
प्रतिप्रस्थातान्वारभतइति वचनात्। तमध्वर्युर्यजमानोऽध्वर्युं। अन्वारभन्ते यस्तनुक्रामते। वहिरणाऽध्वर्युरादा
याश्राव्याहोपप्रेष्यहोतर्हव्येभ्य इति। अनंतरं यजमानस्याभिहितवारध्वर्युग्रहणं। रेवतिर्यजमान इति गा
चयति। रेवति यजमानेर समुमंत्र यजमानं वाचयति। शामित्रं नातीयात्। शामित्रमत्तो त्वनगच्छेत। शामित्रेग्निं
निरध्याति। पतो गृहीतो ग्निस्तत्र निधानं मा भूदिति पुनः शामित्रग्रहणं। निर्मथ्य मेके॥ अग्निं निरध्यातिनुस्पष्ट तिथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क॰सू॰ द्विकस्यः पश्चादूर्णामुपास्पतिवर्षीयोवर्षीयसीनि।। शामित्रस्यपश्चात्।। मंत्रश्चानेकयजमानके विपरिणाम्यते। तस्मिन्नेन निबु
८ तिप्रत्यक्कुश।। समुच्चयादेतस्मिन्स्थले पशुपश्चकुशिर संवच्छ पार्श्वे निधनं त्रिपाककुशीरसंज्ञा। उदक्वादतावर्त्तते एव
।शिरसोदिग्नियामपि मतिषुत्वपस्यादस्मादत्तावार निष्ठी कर्त्तव्याचोदकानुग्राहाय।। स्थितह्यस्मुखंतमप्यंस्यबाध्य
मानं। मुखग्रहणपूर्वं कृतमनं यथाशङ्क्यं न कुरोति।। वेष्ठकेणवा। नमयंति वेष्ठकश्चात्र उक्तउच्यते। एतमाहवनीयमा
वस्यामते ध्वर्ग्यादयः। सोऽत्रपयावर्गं निमित्ते ह्यात्।। अनेन मंत्रेण शमिता अतो मंत्रपयसं उपनं कुर्युः अन्वंगनि
तिदेवाअप्रत्यनुगच्छन्त्वित्यर्थः। तथाचश्रुतिः स्वयस्वाहावंग नियेतहि त्वपदेवान्नुगच्छतीयेर्वच कुर्वाणकपाशुर्वे ऽस्य
पदस्यविपरिणामः स्वाहादेवेभ्यइतिजुहोति। पूर्णाहुतिविकारत्वात्स्रुवकजुहीतेनतदुष्मंबन्त।।।। ।।संज्ञूमः पश्चुरितिप्रोक्ते
शताननुष्कृतेमित्याहासोमे। संज्ञूमः पश्चुरितिशमित्रा ह्केश तानुष्कृतेमित्याह।। सोमे अत्र सोमग्रहणेन चान्दि होमि
धीयते। तमेवहि प्रकृते वेर्ध्यपते।। तस्मादुपश्चुसंज्ञ मंत्रपाठेतानुष्कृतमिति।। ।।देवेभ्यः स्वाहेतिजुहोति।। ९
घृतेतुहिस्कृतेनैवाज्येन।। ।। नमैतेतुकुर्यात्। वाशब्दोविकल्पार्थः। एवंहि श्रूयते तेवाएते परिपशव्य इत्याहुतीमय
दिकामयेतनुकुर्यादेतेषपूकामपेतापिनाद्रियेतेति। तथाअन्त्रप्रणीभ्यांनियोजनेचाचालेनप्रास्यतिमाहिर्भूरिति। एसू॰ ८
रशनावनुस्य पिविकारत्रहितदाकुशर्वेउपमार्थ्यवान्नविपरिणाम्यतेतानुपमायाश्चानंगत्वादविपरिणामः। अंगमन्तंहिप्र

काशयितव्यं। नचोपमांगमन्तेति। भूरितितुपदं रशनापरत्वाद्धि परिणाम्यते। प्रतिप्रस्थातः पत्नीमुदानयेत्याह नेष्टरिति
सोमे।। सोमग्रहणं वसोमविषयमेव। तत्रहि नेष्टाविधानेऽरेच पत्निहोमवादेषुपश्चुषु प्रतिप्रस्थातरिति वक्तव्यम्
।।पान्नेजनहस्तावावयतिनयत्नमस्तश्चानेनेति।। यान्नेजनहस्तां पत्नीनमन्वाचपतिनमस्तश्चातानेतिपत्नी
युक्तेवमक्रुवर्थवादेकेवयान्तेजनहस्तांसंस्कारार्थत्वात्सर्वो मावाचनमिति।। ।।शेषाःप्राणान्छुंधतिपत्नीप्राणाश
क्वेनप्राणायतनान्यभिधीयन्ते। तानिपान्नेजनीभिरद्भिः पत्नीशोधयतीत्यर्थः।। नाभिरद्याहंनीमाह मुखंनाभिके
चक्षुषीकर्णौनाभिंमेढ्रं पायुंपादांस्तहसवाचंतेश्चुधामीतिप्रतिमंत्रं। मेढुंप्रजननमुच्यते। शेषंप्रसिद्धमेव। शेष
णत्यजमानश्चाशिरः प्रभृत्यनुषिंचतः। पान्नेजनीशेषेणापजमानश्च शत्वाध्वर्युश्चाध्वर्युः कारणेयाथांप
र्यात। अध्वर्युश्चयजमानश्चेतिविलिंगवादमिधीयते। मनस्तइतिशिरः। शेषमंत्रायथार्थंविनियुज्यंते।। ।।
यज्ञेकूरमित्यंगानि। अनुषिंचतः इत्यनुवर्त्तते।। शमहोभ्यइतिपश्चात्पशोन्निषिंचतः। संस्कारत्वाच्चाव्यतिरिक्ते
निषिंचामीतिचमंत्रेध्याहारः। उत्तानंपशुंकृत्वाग्रेणनाभिंतृणंनिदधात्योषधइति। नाभ्यग्रेहिवपापाःस्थान
मिति। स्वधितइतिप्रज्ञातयाभिनिधायच्छिनत्तिअग्रं सव्येकृचादक्षिणेनमूलमुन्नयतोनच्छिन्नोहितेनरक्षसामि
ति। प्रज्ञातायच्छन्ताकाधाराउच्यते। यथापश्चुसमंजनंकृतंछिन्नासस्तृणंचमेरणासंसव्येपाणौकृत्वादक्षिणेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृ.सू०
६

मलं छित्वा गुरुणां कृत्वा मध्यतो नखिकृत्वो हितेन रक्षसामिरसनेन मंत्रेण ॥ निरस्तमि स्पपा स्यति । अत्रं मखं ॥ इदमहमित्यभि
विष्यतिय जमानः रक्षो भिधाय कृत्वा तु इदं कोपस्पर्शनं । अत्र बहुयाजमानं केवल एवामिति इति वचनार्थत्वात् ॥ ॥
वपामुत्खिदय वपाश्रप्यत्यो भोरोणीति ह्वजेन घानाहृत्थिवी इति प्रोणोति वपयोर्वे इषपति वपाश्रप्यत्यो त्पोन्य उषा
कार्यो भस्मात् मन्त्रेणो हितेनादानं धोः मुः हथिवी स्पृति । परिवासस्वाचा चालैः बसि च्छरणा मित्रप्रतपति । परिवा
सनं चैछिदनमुच्यते ॥ ॥ शामित्रैव देश माहवनीये प्राप्य सम्मीनं तच्छ पुनमुत्युत्युक मग्नी शाहानं इति पुनः
श्रद्धोपादानात्त्रिसंभे थपपक्षे शामित्रे वदेश स्य न माहनमिति । काशाखानामपि चतन्तुनरप्यं जोतीतिपद्य
ते । पुनः शद्धस्प कृतार्थत्वा ज्ञिवातां रणयं चाध युर्वोपो वरिति । आहवनीयमास्यनी ति वचनेन । अधस्त
नपदार्थाग्नी त्रिसुक्तः । वशाहेन तस्यानुकर्षणामामृहिमसंबद्धपुंग्रहणां । एवं चानेनैव ज्ञापकेन ज्योतिष्टोम
नेष्टाती तद्वेमेनं वायव्यपती युक्ता सोमक्रयण्या चसमी स्मनानां मित्यत्र वशाहेतेन धुरेवानुषंगं युक्तं ।
तथा च ब्राह्मणं । तांनेष्टावायचती ति प्रकृत्य त्रय्यैतां सोमक्रयण्यापा संख्यापयती स्याह । उत्तरस्ततस्तिष्ठन्प्रत
प्यव यामंतरा यूपाग्नी दृच्वा दक्षिणातः प्रतिप्रस्थाता श्रपयतिपरी सा उत्तरतस्तिष्ठन्नाहवनीये प्रतप्य व
पामंतरेण यूपाग्नी दृचा प्रवैरण यूपंपरी त्य दक्षिणतो मवस्थितः प्रतिप्रस्थाता श्रपयति संप्रदायेनुचा चा लावसेका

राम
६

दिप्रतिप्रस्थाता चात्रालेव मित्र्यशा मित्रे प्रतपतीति प्रतपनं च श्रपणोद्देशः तां पशुश्रपणे प्रतपतितथोहास्यात्रापि
श्रता भवतीति श्रूपते । श्रपणं च प्रतिप्रस्थात्र कर्तृकमिति संप्रदायः ॥ वपां श्रुतेना भिघार यत्पग्निरा ज्यस्पेति
। अभिधारणानुप्राकृतमेव । कृतिलिंग संयोगादत्र श्रस्यात्स्यमाज्यमिति ॥ स्तोकेभ्योनुब्रूह्य प्रतिश्रुतायां श्र
ताप्रचरे त्याह प्रतिप्रस्थाता । स्वाहाकृतिभ्यः प्रेष्यति स्वाहाकृतिशब्देनोत्तमः प्रयाजो भिधीयते । हुत्वा वथा
मभिघाय प्रतिप्रदातुं ध्रुवां प्रथममाज्यभागौ चेत् । चेच्छब्दोपपर्थः । यथाज्यभागावत्र क्रियेते इति निरूढ
त्वाज्यभागयोर्विकल्पः इति नोच्यते । अत्राज्यभागौ कुर्वेनिति आज्यभागौ कुर्वन्मंत्राव ग्रसरे करोतीति अग्नी
षोमीये पुनराज्यभागौ न स्तः पूर्वे स्तु कृतमेव । वपया चरिष्यन्नुपस्तीर्य हिरण्यमवधाय वपामवधन्नाहेन्द्राग्नि
भ्यां छागस्य वपायै मेदसोनुब्रूहीति । उपस्तीर्यनु ह्यज्यं हिरण्यशकलमवधाय वपामवधन्नाहेति च स
ह्रानुवाक्यार्थं इन्द्राग्निभ्यां छागस्येति च प्रयोगोपदर्शनार्थं न सोमीयादिकक्रणार्थं विकल्पेन त्वपं देवता
श्रवणामिति ॥ हिरण्यमवधायद्विरभिघारणां सोमा विशृष्टेनु सक्रुद भिघारणां । स्वाहाप्ये वा पंचावत्तावप
भवतीति वचनात् । सोम शब्देन चाग्नीषोमीयोपलक्षणं । यमतस्तु द्विरवधारणेपुनिरुढवर्जं सर्वत्र द्विरभिधार
णामिति ॥ ॥ आश्राव्याहेन्द्राग्निभ्यां छागस्य वपायै मेदः प्रेष्येति । एतदपि प्रयोगोपदर्शनार्थमेव । प्रस्थितमिति चप्रसु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क.पू० तोपसुतशब्देन सर्वनीयोभिधीयेते तद्धि अरेषु च प्रस्थितशब्दप्रयोगे सोत्रामण्यामुपसंहारात् इत्यत्र न भवतीत्युपसं
१० हृतो हि प्रस्थितशब्दः सोत्रामण्यां प्रस्थितमिति च त्रिपशोः सर्वे मिति॥ कुर्वाव पा श्रपरापावनुप्राप्स्यति प्राचीं विशा
लां प्रतीचीमितरां स्वाहाकृतेद्रिति च पाश्रपणीं वहन्नेमं त्रय्यविष्टिरेणाभ च चात्वाले मार्जयन्ते पत्नी पत्नीकाइद
मापः प्रवर्तते ति। मंत्रलिंगाच्चात्वाल्मार्जनमिति। विशास्ति पशुमन्यः शसुहिं सायां। अन्यः पशुं हिनस्ति मा
रयतीत्यर्थः। कुत एतत् द्रष्टव्यमिति। संज्ञाभेदात्। अन्या हि संज्ञा शमितेति। संज्ञाभेदाच्च संख्यांतरे प्रतीतिर्भवति। दृ
वङ्गो यजते इति यथा॥ एवं प्राप्ते विदमुच्यते। आर्त्विजां वैकोऽप्रकृमत्वाच्छामित्रे। आर्त्विजां वैकः करोति
संज्ञपनेनान्यः कुत एतत्। अप्रकृमत्वाच्छामित्रे शमनकर्मणि संज्ञपनेनैवार्त्विक्कल्पितो दृष्टः पतेवेद।
ननु शमितेनं कं वद्यामयतीत्यल्पप्रकल्पनं उच्यते॥ आर्त्विजामेवैकः शमनक्रियायोगाच्छमितेति तस्माद
र्त्विजामेकः करोति॥ किंच। उपगाद्दर्शनाच्च दृश्यते चायमर्थोऽपश्यात्र्वित्विजामन्यतिरिक्तस्याप्रकल्पनेनार्त्वि
जामेव कर्तव्यमिति। सेमित्यर्त्विज उपगायन्त्यामितियजमानइति आर्त्विजामुपगानं दर्शयति। विधिरिति चेत्। अमे
वं॥ ॐ मित्येवं परत्वादाकाश्यमस्यापधामानमान्विजो नु वदतीति तद्विधानेन हि वाक्यभेदप्रसंगः तथा नाध्वर्युरुप राम०
गायतीति अध्वर्योः प्रतिषेधं ब्रुवन्नृत्विजामुपगानं दर्शयति। एवं तावदेकेषां चिदयमवगिद्धांतः आर्त्विजां मध्ये एकः क १०

र्त्विक्करोति। अत्रोच्यते। यदुक्तमप्रकृमत्वाच्छामित्रइति तन्नैवं येनार्त्विग्व्यतिरिक्तस्य शमितुः प्रकल्पनं दृश्यते शमि
तेनं कं वेदधानयति। तथा स्तंहविः शमितारमिति तत्र तत्र शमितारं दर्शयति। ननु आर्त्विजामेवैकः शमनं कुर्वन
शमिता भविष्यति। नैतदेवं दर्शनमिति नेत्युच्यते। आपत्तेषु आर्त्विक्शामित्रं च ब्रवर् गाद्यपङ्दत्तिगम्यते। प्रतिप्र
स्थाता पशुमन्वारभतेत्याध्वर्युर्मैत्रावरुणो ग्निगुप्रैषेत्याग्निमोहोतातृ। आग्नीद्रुल्मुकमादाय पाग्रतो गच्छति।
ब्रह्मा कृताकृतप्रत्यवेक्षणे। एवं सर्वे विक्षव्याप्टेषु शमिता प्राप्यते। अतस्तेभ्योऽन्य इति गम्यते। यच्चोपगाद
र्शनमुक्तं तदप्रकल्पितविषयं। अपि च संज्ञपनेऽपि विक्कदेत्रे स्तिसमाप्य याध्वर्युः प्राप्नोति। तत्राध्वर्युः शमित
संवादेदृदमनुपपन्नार्थं भवति। अनेनाध्वर्युर्भवति शमिता रिरिक्नो भवतीति तस्मादन्यः शमितेति। अथ वानेनद
त्रेणा विकर्तनमुच्यते। विशास्ति पशुमन्यः अन्यः पशुं विकर्तनं करोति। नत्वार्त्विगिति। कुत एतत्। अभिप्रद
र्जत्वात्। तमारणो हि शमितुरभिप्रदत्त वा द्दिक्कत्तेन पिहेदे ऐति। एवं प्राप्ते विदमुच्यते॥ आर्त्विजां वैकोऽप्रकृमत्वाच्छा
मित्रे। आर्त्विजामेवैकः पशुं विकर्तनं करोति। न शमिता। कुत एतत्। अप्रकृमत्वाच्छामित्रे। शामित्रं ब्राह्मणेन
विकर्तनमभिधीयते। तत्र नान्यः प्रकृतः। यत्र वचनात् अन्यः प्रकल्पितः तत्रार्त्विजां कर्तव्यं उपगादर्शना
च्चेति व्याख्यातं॥ विक्रयी त्वन्यः शूद्रसंयोगात्। विक्रयी च पुनरन्यो भवति कुत एतत्। शूद्रसंयोगात्॥॥ अंगाम्सवधात्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दे.प्र. ११ मंजनत्र्प्रनवखंउयन । हृदयं जिह्वा क्रोडं सव्यमस्थि पूर्वेन उक्तं । पार्श्वे यकृत्चकौ गुदमध्यं दक्षिणा श्रोणिरिति जौहवा
नि । क्रोडशब्देन वक्षोभिधीयते । यकृच्छब्देन च कालिपं गुदं पक्वाशयस्थानं तन्मध्यं दक्षिणा च श्रोणिः । एतानि
जौहवानि जुहूमवस्थानि । दक्षिणामस्थि पूर्वेन उक्तं गुदं तृतीयाणि अपिषत्रं सव्या श्रोणिरित्यौपभृतानि । सक्थि सच
तेत्र मस्कोस्मिन्काय इति खवक्षोभिधीयते । तस्याय पः पूर्वः प्रथमो न उक्तः सोवदय । गुदतृतीयाणिथं गुदतृती
यस्यलघुतरं सव्या श्रोणिरित्यौपभृतानि ॥ उपभृत्यवदेयानि । बर्हिषद मुपयद्भ्यः । यद्वर्षिष्टं महत्तरं गुदतृतीं
यं तदुपयद्धोमार्थं । एवमेव हविर्विभागश्रवणात् । अवदानकाले प्रभागः । गुदस्यानेदानीमेव जोहवोथ स्तवि
वेकार्थत्वे तद्वचनं ॥ ॥ वनिष्ठुजाघनी चावद्यति । वनिष्ठुः स्थूलांत्रं । जघनस्य देशे भवा जाघनी प्रसिद्धैव ॥ ॥
क्लोमप्लीहाध्यूघ्नोपुरीततं वेदत्रवद्यति । क्लोमा गलककनाडिका प्लीहा प्रसिद्धा एव । अध्यूध्नी गुदप्रदेशव्यापरि
भवति पुरीततं छिद्र नहृदयमवच्छादितं येन तदुच्यते । पुरीततपुरीषं हृदयं तस्पुरी ततता च्छादयतीति श्रुतत्वा
त् । एतानि भागावदानानि । एषामत्र विकल्पोऽन्यत्र नियम अग्नीषोमीयेत्र भावदुत्तमुक्तमेव ॥ उदरं मेदो वाशि
ष्टं गुदे प्राप्यति कृशश्चेत् । उदरे यतमेदो गप्रहणो नाग्रहीतं तदवशिष्टं गुदे प्राप्यति यदि कृशः पशुर्भवति । कृशो दम० ११
दुर्बलइत्युच्यते ॥ अत्रानुवषमवधायत स्मिंल्लोहितं रक्षसामिति । अप्रेगं तत्रानुवषमवधायतस्मिंन्लोहितं रक्षसा

मित्यनेन मंत्रेणावदधातिप्रतिपत्ति सेपंपंश्वतश्च बहुषु पशुषु सर्वेषांप्रतिपत्तिः । मूलेहृदयं प्रतप्य शामित्रे श्रपयति
। हन्नाप्यग्निकाग्रादुखायां श्रपणोप्रामेव च नाङ्कलेप्रतप्य श्रपयां मूलस्यचोखाकार्या पत्याश्च मामंत्रेणादानं ॥ ॥ पशु
चोखायां ॥ चशब्दाच्छामित्र एव श्रपयति । अत्रा हि वचनं भवति स्थर्यपैमितमुदंचं पशुश्रपणा याहरंतीति । पशुदे
वतायै पुरोडाशएकादशकपालः अग्नीषोमीयोत्र पशुरुद्देवसः पशुपुरोडाशद्वइतिते देवसता विहिता । इहक
पालार्थीयमारंभः अग्नीषोमीयएकादशकपालः पुरोडाशेन्वयमाप्यात दन्वपाच्छिनैकादशकपालतायुक्ता
इत्युक्तं ॥ ॥ अग्नीषोमीयो वा विशेषोपदेशात् । वाशब्दः पक्षव्यावृत्तौ । नन्वेकादशकपालतां कर्तुमाक्रि
कारणाम । येनाग्नीषोमीयदेवताद्वित्वसामान्य विशेषणोकादशकपालता भवति । जथाचामिषेवनीयेः
नृघते । अग्नीषोमीयमेकादशकपालं पुरोडाशं निर्वपति तदनुदेवधाप्ं हवींषि निरुप्यंत इति । न चा
ग्नीषोमीयपशुपुरोडाशविकारस्य वत्तरेषु पशुपुरोडाशः । पुरोडाशविकार एवायं । तस्मादेकादशकपारि
माणादिभिरिहकपालसंख्यानैकादशकपालइति । अत्रैव हविष्कृदाह्वानमिति सैकच्चात् । हविष्कृदद्ध
नाहनमपोरेककालं चमुक्तं । यत्रैषहविष्कृतमुद्वादयति तदेकोदपत्रदुपलेसमाहंतीति । हविष्कृदाह्वा
नं चहवि निर्विपत्सर्थीहविः करोतीतिहाकिं कृता तेनौषधपृसनीनि । आह्वालकालत्वा च्छ्रहनन मप्यत्रेवावमते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृ.ए.
१२

नोच्यते हविः कृताद्धानमेवात्र भवति। आहननं तु पशुपात्रप्रोक्षणोत्तरकालमेव। तस्य हि पाशुबन्धयाम्यैहैकवाक्यत्वं। आद्धा
नस्य पुरोडाशेज्यायेति॥ अवघन्नाहेन्द्राग्निभ्यां पुरोडाशस्यानुब्रूहीति। महानुवाचनेन्द्र ओच्चारणांचवनात। इन्द्राग्निग्रह
णानुप्रदर्शनार्थो। सूर्यप्रजापत्योरपि पक्षेमाभावात॥ ॥ उपभृतिवावद्यति स्विष्टकृद्भ्य। चतुरवद्यादनंतरमेव स्विष्टकृदर्थस्यैव
स्विष्टकृद्वदित्युच्यते। स्विष्टकृ एवदानस्याकालत्वात। अपि च॥ स्विष्टकृ एवदानं जुह्वां प्राप्तं तदिहोपभृती तिवक्तव्यं
॥ ॥ इन्द्राग्निभ्यां पुरोडाशमिति प्रैष्यति। प्रदर्शनार्थमेवेदमुक्तं॥ ॥ जुह्वां समानीयाग्नयेप्रदाय॥ जुह्वां जौहवमौपभृ
तं समानीय अग्नये प्रदानं करोति॥ सगुणस्थाने गुणः स्विष्टकृद्गुणरहितायाग्नये॥ कृत एतत॥ सर्वविकारए
कत्वात॥ सर्वस्मिन्विकारे एकत्वे निर्गुणाभिधापकत्वं दृश्यते अनुवाक्यायामिन्द्राग्नी अग्नेपुनुहऽं मऽं निमर्गोद्रु तिवि
गुणामभिधानं तथा मैत्रावरुणप्रैषे होतायक्षदग्निं पुरोडाशस्य जुषतामिति याज्यायामपि स्वदस्वहव्या समिषो
दिदीहीत्यस्मन्यक्तं मिमीहि अग्ने वीहि विश्वं अग्न इति। एवं सर्वत्र निर्गुणाभिधानं। यदि चाग्ध्येपुरपि अनुवाचनप्रैष
योर्निर्गुणामभिधानम स्विष्टकृद्वत्कं करोति तदा याज्यानुवाक्याप्रैषैः सह एकवाक्यता भवति इतरथा क्वचित्सगु
णं क्वचिन्निर्गुणांभिधानमित्यसमंजसं स्यात। यथाम्नातेवाचवविभेदात। यत्र यथाम्नातं तत्र तथैव कर्तव्यं। भिन्नेहि वा एप०
क्याप्रैषैः सह एकवाक्यता भवति इतरथा क्वचित्सगुणं क्वचिन्निर्गुणांभिधानमित्यसमंजसं कथयोऽज्यानुवाक्याप्रैषविकारणां। १२

विधानं। यथा वचनं च सर्वत्र कर्त्तव्यताप्युक्ता। तेन वा शद्धात्यक्षोविपरिवर्त्तते। इडामवद्यत्यक्रियान्यस्य समानार्थत्वा
त। इडाग्रहणं शेषकार्योपदर्शनार्थमन्यापस्यतुल्यत्वात। नतु ध्रुवार्थमिडादीने नावद्यति पशुपुरोडाशे चोदकप्राप्त
स्याः पत्नीधानादेरदृष्टोपकारस्याक्रिया। कुत एतत। समानार्थत्वात। यथैवोपकारं पशौ प्रयाजादीनि कुर्वन्ति पशु
पुरोडाशेपितमेव। अतः पश्वर्थमनुष्ठितानां पुरोडाशेप्युपकारप्रसंगइति॥ ॥ न चोदनाभेदात। नैतदस्ति यदुक्तं
। किंकारणं। चोदनाभेदात। भिन्नेह्येते चोदने अग्नीषोमीयमजमालभेत। अग्नीषोमीयस्य वपया प्रचर्याग्नीषो
मीयमेकादशकपालं पुरोडाशं निर्वपतीति। यत्र ह्येकेन शब्देनोपादाय पश्चाद्विधानं। यथा वैश्वदेवेन प्रजाकामं
याजयेदिति। तत्रोपादेयत्वेन विधानात्साहित्यविवक्षायां गुणपदं गोपकारापेक्षात्तेनागत्यमामाविशेषात्सन्नि
धानाविशेषाच्च तंत्रेणांगोपकारसंबंधः। इह पुनश्चोदनाभेदादेतन्न संभवति॥ ॥ कालगुणाभेदाच्च॥ ॥ अन्य
स्मिन्काले पशोः प्रयाजाः कृताः अन्यकालीनस्य कथं पुरोडाशस्यापकुर्युरिति। तथा गुणाभेदाच्च एकादशसंख्या
गुणाकाहिपशोः प्रजायाः पंचसंख्यागुणकाः पुरोडाशस्य। अतोपि न तंत्रेणोपकारसंबंधः। एवमाचार्येणोपक्षद्द
योपन्यासः कृतः। अत्रय एव न्याय्यतरः पक्षः स एवांगीकर्त्तव्यः। कस्मात्सोत्रक्रियापानस्य समानार्थत्वादिति। अ
गोपकारस्य हि आम्नानसामर्थ्यादेतेवपवेसंबंध इष्यते। इतरेषां गप्रधानयोः संबंध एव भवति। यदांगानि नतदा प्रधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क॰प॰ नानिप्रधानकालेचनांगानी॥ति॥एवंचसतियद्यप्यत्रचोदनाभेदस्तथापिप्रयाजकृतमप्यंत्वेविद्यमानत्वात्पशुपुरो
13 डाशे विप्रसज्यतएव॥ चोदनाभेदोत्राकारणमिति।तथाकालभेदो गुणभेदश्च।जस्मात्साध्यमिति तमिदाम
वघत्याक्रियास्यसमानापेक्षा इति॥ ॥पशुर्दक्षिणाधेनुर्वेगावामाजि्रति।पशुरेवपशोर्दक्षिणेतिपुंप
शुर्गस्यगोवरशब्देनस्वाधीनंद्रव्यमभिनुचितमुच्यते।माजित्तग्रहणेनचसंनिधानात्पशुपुरोडाशेडामाजि
नंगृह्यते। तथाचश्रुतिः।पशुपुरोडाशेडायामेवोपहूतायांदक्षिणानयेदिति॥ ॥आचार्यैर्णांगजपनव
पोर्चिदनुप्रसंगेनपशुविकृतेनाधुस्वाप्रक्षेपणांतेमभिहितो।अवसरःपुनरस्यायेनैवंहिश्रूयते।अथपद
यमाप्रचर्येतेनपुरोडाशेनप्रचरतीतिप्रकृत्यतस्मात्पयपाप्रचर्येत्तेनपुरोडाशेनप्रचरत्यपवैवेतस्यबंधु
यन्निक्कचैषपशुपुरोडाशोनुनिरूप्यतेथपशुर्विशास्तीति तथाशाखान्तरेः अग्नीषोमीयस्यवपयाप्रचर्या
ग्नीषोमीयंपशुपुरोडाशमनुनिर्वपतीति।अतोत्रैवपशुविकृतेनाधुस्वाप्रक्षेपणांततः।शमितारंशास्ति
विःप्रक्वावयतात्रिःप्रच्युतस्यहृदयमुत्तमंकुरुताघत्त्वाघ्छाद्ब्रतेहविःशमितारितिश्रुतमित्येवमूत्तान्नभ
तंभगवोनभ्यंतेहीति।हृदयमुत्तमंकुरुतादित्यनेकपाशुके विपरिणाम्यतेघत्वाघ्छादित्येवमादिद्वितीयमनु ए॰म॰
शासनमतस्तृतीयमत्रवेनशमितुरनुशासनप्रैषमंतीनियुक्तेतदेवमादिप्रैपेतंप्रवानुशासनस्यवर्थोनिर्दृतएव॥॥ 13

त्रिः प्रच्युतेहृदयंप्रकृत्योत्तमंकरोति॥प्रत्यावनंचोत्सेचनमुच्यते।बहुत्रिष्कर्षैःमूलात्रिष्कृष्यहृदयमुत्तममवदानो
त्तमंकरोति॥ ॥मूलंचाभूमौ॥ करोतिनिवर्तते।जुह्वाप्रेषरोजस्याहोयोपनिष्क्रम्यप्रष्ठुतिशृतंहविःशमितारि
तित्रिरभिक्रामम्।जुह्वापृषदाज्यंगृह्णीत्वाचावाल्लोत्तरांनिरशोपनिष्क्रम्यत्रिः पृच्छति॥ शृतंहविःशमितारि
त्यभिक्रम्याभिक्रम्य॥ ॥प्रोक्तेनचैवनामित्याहोपांशु।शृतमितिप्रोक्तेप्रमित्राप्रतिपश्नेतदेवानामि साहाधपु
त्रुपांशु॥ ॥स्वेमनइति हृदयमभिधार्यमंत्रो।पशुमभिवारयतीतिसूत्रशेषः।पृथक्त्वेनहृदयग्रहणात्तपृषदाज्येना
भिधारणंतस्यवइतरस्येतरेणात्स्येनतहोमंवप्राकृतत्वादभिधारणस्यमंत्रस्तुवचनात्हृदयएव॥ ॥पश्वसीव
पावद्यावदक्षिणतः प्रतिप्रस्थातावेघाग्लक्षशाखास्ववद्यति।वपावदित्यनेनरायूपाग्नीहृत्वादक्षिणतोवेद्यामा
सादयति।उत्तरतआसादनेप्राप्तेवचनाद्दक्षिणतइत्युच्यते।उक्षास्थस्य स्नाम्नाप्यविकारादासादनेप्राप्तेवच
नाद्द्यामित्युच्यते। प्रतिप्रस्थातानुप्लक्षशाखास्ववद्यतिवचनात्।आज्यंमनोतामध्यपरिव॥ ॥जुहूपभृतोस्तुप
स्तीर्णेतिवचनाद्देमहवन्यांपात्र्यांचमनोतायेहविषोवदोपमानस्यानुवद्धौसुक्तेस्कचौरवद्यतियथोक्तंहि
र्द्धिः।यथोक्तग्रहणाज्जौहवानिजुह्वामौपभृतान्युपभृतिद्विरवदानंनुवचनात्।नानिद्विर्द्विरवद्यतीति॥ ॥अ
शेषगुदतृतीयेगुदतृतीयेपुनरशेषगृह्यते॥ वपावद्विरशंप।अधस्तादुपरिष्टाच्च।मनोतायैप्रस्तप्रतिप्रस्थातुरेवेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृ.सू० १४

संप्रदाय ॥ रेरसीति वसां गृहीत्वा द्विरभिघार्य प्रस्तुतमिति पार्श्वेन वसां प्रज्ञातयमिनाशा । रेरसीत्येनेन मंत्रेण वसाहोमं व
न्यां वसां गृहीत्वा द्विरभिघार्य प्रस्तुतमित्येनेन मंत्रेण पार्श्वेनाभिनावधूलयति । शेषमिडापात्र्यां मासि स्थन्को डमनस्था
नि च आस्यति । श्रोणिवंजुः । दोस्तकपरिभाषा चातः पूर्वं प्राशित्रग्रहणं । तत आसेचनादि ॥ ॥ जाघनीं गुदं नि
धायेहन्द्राग्निभ्यां छागस्य हविषोऽनुब्रूहीति । जाघनीगुदयोः संनिधानमुच्यते पशुसंमर्शनाभावप्रसक्त्यैवोप्र
तिपत्तिर्हि पशुसंमर्शनम् । नचैते प्रतिपाद्यं कार्पीथं वा त । इन्द्राग्निभ्यां छागस्य हविषोऽनुब्रूहीति प्रयोगोपादर्श
नार्थमुक्तमेव ॥ ॥ आश्राव्याहेन्द्राग्निभ्यां छागस्य हविः प्रेष्येति । एतदृषि प्रयोगोपदर्शनार्थमेव ॥ ॥ प्रस्थि
तमिति च प्रस्तुते । प्रस्तुतशब्दे न सवनीयो लभ्यते । नानूवंध्योपि । येन सवनीयविकारत्रिपशौप । स्थितं वाक्ये सु
पसंहरति । प्रस्थितमिति च त्रिपशोः सह्वमिति । ॥ अर्धचैतैर्याज्यायां पवसे केर्दशं जुहोति छतं घृतपावानइति
। याज्या याहुतिपक्ष्पर्थं चतुर्थी ॥ ॥ दैवतं हुत्वा मदाक्षिणा माहृत्य जुह्वामुपदास्योपदधं त्वा हवनस्पतयेनुब्रूहीति
। प्रदक्षिणाग्रहणामितरथा हुतिं कुरावार्थे । उपघृतेहिं जिह्वग्रहणार्थः अन्यत्रापि दृष्टः । अथ स्रुवेणोपह
त्याज्यमिति । समभिधान्यस्योपहत्यासीन आहुतिं जुहोतीति च ॥ आश्राव्याह वनस्पतये प्रेष्येति । अस्य च स्वि एम० १४
ष्टकृद्विकारत्वे संकर्षणोक्तं द्वितानां कौलेनाग्निवात्रस्विष्टकृद्दुपहत्यासीन आहुतिं जुहोतीति च । आश्राव्याहवन

स्पतये । प्रयोजनं नोपांशुयाजविधानतः स्वरः आत्रेयो विष्टकृतः । वानस्पत्यं हुत्वा संसमानीयसौ विष्टकृतं द्रव्यमोप
भृतं स्विष्टकृद्यागं करोतीति स्त्रेषः । समानयमानेन स्विष्टकृदनुयाजं च न कृतेऽयं । अथ पान्नुपहस्य वदाना
निमर्दति तानि समानयमानं आंहेति वचनात् ॥ ॥ श्रेष्ठं त्यवादिशो आज्ञाय स्विष्टसाझेयं राजा वाजिनवत् । न्या
पात्रस्थस्यैव व्याघारणो प्राप्तेवा मंदेनपक्षं व्याकस्यैजुहोति त्वा तज्जुहोति स्थानमुच्यते । वाजिनवद्व्याघारस्य
ति । इयांस्तु विशेषः ॥ ॥ सर्वं जुहोतीत्युक्तः प्राणाइति पशुं संमृशति पशुशब्दश्च मांसोपलक्षणार्थः । तानि
चोपयुक्तानि रिक्तानि गृहीतव्यानितं संस्काराद्विमाथार्था कर्हीनाच्चविमाथार्थंका हि तत्रैव भवति । नोप
युक्तेषु । अथ पशुं संमृशतीति प्रकृतस्वाहाथ यत्सुराष्ट्रसंमृशति पटुपउपतिष्ठन्नेतेविमथिष्यंतइति छंकमा
नइति । तस्मात्प्राशित्रेडाजाघनीगुदस्यातिरिक्तानामेवसंमर्शनं ॥ ॥ अवदायवेडां प्राकस्रुहोनात् ॥ पशुसंमर्श
नं । वाशद्वो विकल्पार्थः । तच्चजाघनीगुदनिधानोत्तरकालं प्राकृप्रदानादिस्युक्तं स्यात् ॥ ॥ इडामादधाति ॥ ॥
वैकृतावपरे प्राकृतानुवृत्त्यर्थं । अतश्च प्राशित्रप्रदानं घृतं । उपहूतां यावदिडामग्नीधे प्रयच्छति । अन्वाधीयं
होत्रे समर्पयति । अन्तरतो ॥ अधिष्ठी भवति । अन्तरेणकर्षे धृष्टीभवतीत्यर्थः । आसिं अपक्षे अन्तरे
डानहीयते । कौमारीनामप्यक्षिणेश्वावसरेसमर्प्यतो । आख्यानातितशाखान्तस्य कौमं ब्राह्मणोझीहिं यजमानायपु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृ·सू० रीतन्नमध्यपि वद्र इति। एषां वात्र विकल्पस्तु क्रमेण ॥ ॥ माज्जिति प्रेष्यत्स्वग्नीद्वै पयज्ञानंगारानाहरोपयष्टनुपसीदब्रह्म
१५ न्प्रस्थास्यामि समिधमाधायाग्निमग्नीत्संमृड्ढीति प्राज्जितिग्रहणं च पवित्र प्रतिपत्युल्मुकमासीयपलक्षणा
र्थमपि। पेन्द्र ऐकृतं प्रेषसमनंतरं ब्रह्मन्प्रस्थास्यामीति प्राकृतमाह ॥ शामित्रादंगारानाहरस्पेव इध्मा हरपा
निद्यपमुत्तरस्या ॥ अग्नीत् उपयष्टो मार्थ ॥ आग्नीध्रोपाद्याचामहोतृ धिष्ण्ये। आग्नीध्रीयोद्वात्रे मात्मनाह
रति सोमे शामित्राद्धीति विकल्पः इयांस्तु विशेषो होतृधिष्ण्ये निवापः ॥ ॥ प्रतिप्रस्थाता पयजति गुदस्त्रती
यस्य प्रच्छेदमनुयाजेषु समुद्रं गच्छेति प्रतिमंत्रं ॥ प्रतिप्रस्थाता पयजति गुदस्त्रतीयस्य प्राच्छिद्य प्रच्छिद्य समु
द्रं गच्छेति प्रतिमंत्रं अंगारहरणात्प्रवृद्दश्यार्थत्वात् अंगारेष्वनुहोतीहस्तेनैवाहस्तेन गुदकांडं जुहोतीति वच
नात्। प्रतिवषट्कारं कुर्वाम नो मद्र इति स्रुवोपस्पर्शनम्। प्रतिप्रस्थातारा गती तिवाक्यशेषः। अनुयाजांते
ष्वनुजुहोति। हविर्नेध्यम इति। अन्तर ग्रहणाच्च धारानुयाजानेष्वनुहोमः चोदितार्थाभिधानाच्च मंत्रस्य
स्वनुबहुत्वे विपरिणामः ॥ ॥ पशुदेवता वनस्पतिर्भागसु व्याहृतं स्विष्टकृद्धिकारश्चात वनस्पते स्पार्भिसं
कीर्तनं वचनादभिधीयते। पशुदेवताया अगुणार्थमुच्चारणं। जाघनी न्यापत्नी संयाजनं। आज्यकार्योप सू०
तेश्च आशादना लेभने श्रप्याः क्रियेते। जाघनी बहुत्वे चामादनमंत्रे विपरिणामः उन्नानापीदवानांपत्नीभ्यो १५

पघाति वचनात्। इडां च ॥ उन्नानाय एवाप रिवत्स्यो ग्नये गृहपतये नीधेवा। अवद्यतिवचनादेश। आज्येन घृतेदेक
स्मे सौकृते ये। पत्नीसाधनस्य हविषो गेजाघनी विहिता। अथ जाघन्यापत्नीः संयाजयन्तीति हिश्रूयते ॥ ॥ सद्वी
वाजाघन्या विशेषात्। सर्वा एव जाघन्याः कर्त्तव्याः। कृतमेतत्। पत्नीसंयाजत्वाविशेषात्। तेवै पत्नीः संयाजयिष्यन्तः
प्रतिपद्यन्तीति त्रिस्रः प्रचरंत स्रोत्रदेवतायजन्तीति ॥ ॥ वहिर्हृदयशूलमगाद्धतिं हृदयशूलमादाय अथ हृदयशूलेनाव
भृथं यन्तीति श्रूयते। अवभृथ शब्दश्चात्रोपचारिकः अपोगमन संबंधात्। अतश्च प्रयोगो न भवति। तथा च मंत्रक
रः वहिर्हृदयो गच्छन्ति हृदयशूलमादायेति शुल्लस्याहानमात्रं च शूलेनाविभृथमिति। प्रतिपत्तिश्चास्याने न कृष्ण
लेपस्य प्रतिपत्तिः ॥ आहवनीये गोपस्थाय त्रताद्यानि चेत। शशहेविकल्पार्थः। पत्रव्रतादीनितानिच हवि
र्यज्ञविधइति ॥ ॥ अन्त्येत्स्य शुष्काद्रेसंधौ तद्धृदय शूलमुपगूहति शुगसिनमाभिशोचपो स्माद्वेष्टिपं च वयं द्विष्मा
मापो मौषधीरितिच। अप्स्वेवत्स्यवती। यदि केशुष्कार्द्रे संधौ तद्धृदयशूलमुपगृहति शुगसी त्यनेन मंत्रेणा चादि
नार्थाभिधानाच्चास्यानेक शूले विपरिणामः ॥ ॥ स्नात्पंतु द्यपात्रं निषिच्यध्रुवं गाम्पं पथोक्तमुपगृहति। प्लेह षे
क्षये। स्नात्पं निति तद्रक्तं प्रतिगमनमनुत्सहन्न ग्रेणाप्सु स्पात्रं निषिच्य शुष्कार्द्रे संधौ यथोक्तं शूलमुपगूहताधा
त्रो धाम्नः सुमित्रियान इत्युपस्पृशंत्यपः। मैत्राभिधानसामर्थ्याद्वनुतोशब्देनापोभिधीयन्ते। उपगूहनं शेषो गृह्यैः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क·पू० पूर्वीमंत्रः उपगूहनेशेषएव भवति विशेषेणोपगूहनमेवार्थंपतइति॥ अभिमंत्रयीतेत्यत्र सुमित्रियानइत्यभिमं
१९ त्रणेगामनुत्पाद्य स्पर्शनेन वा माधेत्द्वितीयापायोरभिमंत्रणांपश्यते। अथाभिमंत्रयते सुमित्रियानइति। कराए
वीयानांवोपस्पर्शने अथापउपस्पृशन्ति सुमित्रियानइति। अतो विकल्पः॥ ॥ नर्मोमनूर्बध्यावर्तुं प्रचायं
लाभ्यथः सोमेनू। बंधावर्तुंनभवति। एवंहिश्रूयते। सैवेनाग्नीषोमीयस्य पशोः श्रोतिनाग्नेयस्य वपाया
स्वानूबंध्यायाइति। नत्रस्वात्रनप्रतिषेधार्थेतानुल्यप्रमाणाशिष्टत्वात्कर्तृशेनेस्याग्नीषोमीयस्यप्राप्नोति वा
वेनप्रतिषेधः। विकल्पस्स्वचान्याय्यत्वात्। अन्याय्यो हि विकल्पः। पक्षेबाधात्। ततः पर्युदासरूपेणानाग्नीषो
मीयस्यपशोः श्रोतिनाग्नेयस्येति॥ अग्नीषोमीयस्य वनीपअति विद्धेपुरूल्लावन्धथइति। वशापाएवा
नूबंध्यायाइतिनित्यानुवादः॥ ॥ वनुराप्रधामनत्समिदाधानंभवतीति सूत्रशेषः। व्रतंविसृज्याप्याग्नी
नांच्छत्रैवनुर्गृहीतंयूपाहुतिवत्। व्रतविसर्गापदेशाच्च श्रेवन्नतंतत्रैवभवति नाग्नीषोमीयइति। एवंविहारोतः
॥ अतः परमग्येविहारः। अत्रकर्मापवर्गादीयतइति केचित्तदयुक्तम्। आतिप्रणीतस्यापवर्गाभिनिवृत्य राम०
र्थत्वात्तत्संस्थाच्चिकर्मापवर्गायाइति। नित्यधार्यार्थमित्यपरे। आतिप्रणीतो हि पश्चार्थेउद्धतस्तदपवर्गेचेष १९
एवविहारोन्याय्यइति। संप्रदायेनुसविहारइत्यग्निहोत्रार्थमुच्यते। अग्नीषोमीयपविकारत्वात्समितेपभिस

नामिरस्या तत्र चाग्निहोत्रंविहारस्यधारकमतम्नविहारइत्यग्निहोत्रार्थमुक्तं। गतश्रियः पक्षस्तत्रन्याय्यतइवाभाति
। अग्निहोत्रार्थत्वे हि विहारस्यासंभवएव। इदमग्निहोत्रंपशुयागान्तवाहूयेत। तंत्रमध्यवा। पदितंत्रमध्येप्रसंगा
इतिमप्रणीतस्यप्राप्नोति। अर्थोतितनोपदृष्टकर्मालौकिकइतिपुनर्नुद्धरणांप्रयोजनपति। पसुनानुच्यते। अ
ग्निहोत्रंविहारस्यधीरकमितितदनुपपन्नं। अन्यार्थो हि विहारोत्रस्यापि समाप्तोन्यमन्निर्विहारस्यधारकमि
तिवुः शक्यंवक्तुं॥ समारूढनिर्मथितेवा। आपएग्नीनांपूर्वेद्वाइपमाहुतिर्भवतिर्भवति॥ यथोत्माहंदधाद
स्यांतत्रोयत्नकृत्यात्तद्धाद्वितिवचनात्॥ ॥ अग्निंप्रणीय सदोहविर्धानाग्नीध्रहोतृधिष्ण्यान्यथोक्तंगृही
त्वान्यान्याग्नेः प्रणयनमग्नीषोमीयदर्शनात्। एवमादौनिर्ह्यग्नीषोमीयेदृश्यते। सदसिधिष्ण्ये नवप
द्धारः। कुतः। अत्र यत्सुवंतिन त्वामिधेनीरन्वाहेति हविर्धानेसामिधेन्यनुवचनं। आग्नीध्रेप्रत्याश्रावणं हो
त्राधिष्ण्ये उपयंत्रोमः। गृहीत्वाद्युत्यान्याग्नीध्रप्रशापने। आग्नीध्रीयाद्गार्हपत्यान्। एतान्निस्वग्नीषोमीयेदृष्टा
नितद्विकारत्वात्राविभजंतीति॥ ॥ नमोमार्थत्वात्॥ सोमार्थानिर्हि एवमादीनि सोमंप्रकृत्य श्रूयंते
। उदमेवाप्यसदः। त्रिरेणवाप्यहविर्धाने। वाहुरेवाग्नीध्रीयश्च माजालीयत्र चेत्येवमादि। प्रसंगादर्श
नं। सोमप्रयुक्तानामेषांप्रासंगिकमग्नीषोमीयेदर्शनां। उर्विहोमेपि धिदानी क्रियतां किमग्नीषोमीयदर्विहोमाः उत्तपदृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कं·१०
१७

वंतइति। तत्रेदमुच्यते। दर्विहोमाः पौर्णमासधर्माजुहोत्यविशेषात्। दर्विहोमास्त्रैयंबकादयः ते पौर्णमासधर्मा भवन्ति।
पौर्णमासशब्देन दर्शस्याप्युपलक्षणं। द्रव्यःसाधनकेषु हि द्रव्यसामान्यात् सान्नाय्यधर्मा इष्यन्ते कुत एतत्। जुहो
त्यविशेषात्। पौर्णमासधर्मा इति। जुहोतिर्यजत्यर्थेऽतोऽविशेषः। उभयत्र हि द्रव्यदेवता सर्वं। त्रैयंबकान्निर्वपतिरो
ह्राननिति। निर्वपतिशब्देनौषधमवगम्यते। सौर्यादिषु दृष्टत्वात्। तथान्यत्र धानाभिर्जुहोति सक्तुभिर्जुहोति लाजै
र्जुहोतीति द्रव्यविधानं मांत्रवर्णिकी देवतेति नोभयत्र द्रव्यदेवतावत्त्वाद्यजतिर्जुहोतेरविशेषः। अधर्मकाश्च द
र्विहोमाः धर्मापेक्षायां च सत्यां द्रव्यदेवतावत्त्वसामान्यात् पौर्णमासधर्मा इति युक्तरूपता॥ किंच॥ जुहूदर्शेना
त्वा। मानुतान्हि प्रकृत्यश्रपते। कथमस्यैता पुरोनुवाक्यवंतो याज्यवंतो वषट्कृतेसु वा कुर्णा भवन्तीति प्रश्नपूर्वकमा
ह। एतेषां दैवसप्तपदानां मानुतानां यानित्रौ। सी प्रथमा निपदा निसा त्रिपदा गायत्री पुरोनुवाक्या। अथ या निच
त्वापुत्तमा निसा चतुष्पदा त्रिष्टुप् याज्या इदमेव कपुत्तमसमयं दंद इति स्कृमनुग्रहः। एतेषां च पौर्णमासे दृष्टानामनु
ग्रहं तुं च पौर्णमासधर्म्मित्वं दर्शयति॥ एवं च सर्वधर्मप्राप्ताविदमाह। तूष्णीमनर्थलुप्ताः वचनान्मंत्रनिवृत्तिः
। अनर्थलुप्ता इति दृष्टेनार्थेनालुप्ता इत्यनर्थलुप्ताः। यथा एकाग्नित्रैपि गार्हपत्यश्च परागदिनेति॥ एकाग्नयः। एम०
एकाग्निसाध्या एव पदार्था भवन्ति॥ अप्रयाजा अनुयाजा असामिधेनीकाः तूष्णीमित्युक्तत्वात्सामिधेनीमहवरितकाश्च १८

निवृत्तिः॥ अनिगदाः। निगदशब्देन प्रैषस्तु लक्ष्यते। अप्रैषकृतादर्थः। प्रतिनिगद्य होमाः तूष्णीमित्युक्तत्वा
देवतां प्रतिनिगद्य होमस्त च्यंते वषट्कारनिवृत्त्यर्थमुच्यते। स्वाहाकारप्रदानाः॥ परतंत्रो समन्तपो जुहोतिमात्रः। प
रतंत्रो समन्तपः। यथा वाजपेये ऽन्नहोमः सर्वमेधे च। तत्र सविधमानत्वादितिन्याय सूत्रमेतत्। पाकयज्ञपशुष्वग्नी
षोमीयविधिरिष्यते। तत्प्रसंगेन पाकयज्ञविषयमिदमाह॥ पाकयज्ञेष्ववत्तस्य सर्वहोमः॥ पाकयज्ञशब्देन च स्मा
र्त्ती होमा उच्यन्ते तत्र होमायपदवत्तं तस्य सर्वस्य होमः कर्तव्यः। हुत्वा शेषप्राशनम्॥ कुत एतत्। अग्निहोत्रेतद
स्य पाकयज्ञस्येवेति श्रुतेः। अग्निहोत्रे हि शेषस्य प्राशनं विहितं। अथैनदग्नेर्जुह्वोत्स्थ्यागमति निर्देशीति
। तस्य पाकयज्ञेन संस्तवं करोति। तदेष पाकयज्ञस्फ्यं पशव्यो हि पाकयज्ञ इति यदि पाकयज्ञे प्राशनमुचितं त
त एतदुपपद्यते नान्यथेति॥ अग्नीषोमीयात्पशुषु। प्राणिसाधनत्वसामान्याद्धि धांतप्रवृत्ता विदमाह॥ शा
खा निर्योजनं। शाखायां पशुनियोगः कर्तव्यो न यूपे। वपार्थं कुर्यान्नौलिपंचसर्वा लिवाचयति। न सर्वीरापैव
ति। सर्वीभावे शेषा तिहृदकृतः प्रधानावदानशेषात्स्विष्टकृदर्थं गृहीतव्यं॥ स्थालीपाकेन महप्रदानं स एम
ह युक्तेप्रधनेन तो पाकिम हि भवति। तथा च सह वमात्रस्थालीपाकस्य नावदानैस्त्रक्तस्थं॥ प्रयोजनेन मंतरायेः
प्रयोक्तव्यमिति। तृणीपात्रोदक्षिणा वरो वा वरो वा। औषधस्य मानपात्रं तृणीं प्रमाणपात्रं स्वाधीनद्रव्यमभिनुद्धितं चवरशवृत्वाच्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क॰वि॰
१९

मिति॥ ॥ ७॥ ॥इतिकर्मविपाकेनिरूद्रपञ्चः षष्ठोध्यायःसमाप्तः॥ ॥शुभमस्तु॥ ॥ ॥ ॥ रामायनम

एम॰
१८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=24.07.19 12:20
,TRANSFERRED=2019/07/24 at 12:26:31
,PAGES=20
,TYPE=STD
,NAME=S0001101
,Book Name=M-1953-KARKBHASHYA SHASHTHODHYAY JYOTISHTOBHAGAT
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection